# FINAL TERM EXAMINATION 2024-25
## SUBJECT - SANSKRIT

**CLASS-IX** **DATE – 05/03/25** **MM-80**

---

**सामान्य–निर्देशः –**

(1) अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति।

खण्डः–अ अपठित–अवबोधनम् – 10 अङ्काः
खण्डः–ब रचनात्मक–कार्यम् – 15 अङ्काः
खण्डः–स अनुप्रयुक्त–व्याकरणम् – 28 अङ्काः
खण्डः–द पठित–अवबोधनम् – 27 अङ्काः

(2) प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।
(3) उत्तरलेखनात् पूर्वं प्रश्नस्य क्रमाङ्कः अवश्यम् लेखनीयः।
(4) सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि।

## (खण्डः –अ)
## अपठित–अवबोधनम्

**1. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत–** **(10)**

डॉ. नागः कश्चन श्रेष्ठः चिकित्सकः। गाँधीमहोदयस्य अनुयायी सः। एकदा सः कलकत्तानगरं प्रति प्रेषितः। तदा तस्य हस्ते अष्ट रूप्यकाणि एव आसन्, तान्यपि चिटिकानिमित्तम्। रेलस्थानके पुत्रैः सह उपविष्टा जीर्णशीर्णवस्त्रयुता एका क्षुधापीड़िता महिला तेन दृष्टा। तस्याः याचनां न कोऽपि आकर्णयति स्म। नागमहोदयः तस्याः दयनीयां दशां दृष्ट्वा द्रुतहृदयः सन् तस्यै अष्ट रूप्यकाणि अददात्। तस्मात् सः स्वयं रिक्तहस्तः संजातः। यानचिटिकां क्रेतुं तत्सविधे धनं न आसीत्। पादाभ्याम् एव कलकत्तां प्रति प्रस्थितः। अष्टाविंशतिदिनानां यात्रां कृत्वा सः कलकत्तां प्राप्नोत्। स्थानकेषु भारवहनकार्यं कृत्वा सः भोजननिमित्तं धनम् अर्जितवान्। परन्तु मार्गे स्वस्य श्रेष्ठचिकित्सकत्वं कोऽपि यथा न जानीयात् तथा व्यवहृतवान् सः।

**1. एकपदेन उत्तरत– (केवलं प्रश्नद्वयम्)** **( 1 x 2 = 2)**

(1) डॉ. नागः कीदृशः चिकित्सकः आसीत् ?
(2) एकदा डॉ. नागः कुत्र प्रेषितः ?
(3) डॉ. नागः कस्य अनुयायी आसीत् ?

**2. पूर्णवाक्येन उत्तरत– (केवलं प्रश्नद्वयम्)** **( 2 x 2 = 4)**

(1) यानचिटिकां क्रेतुं तत्सविधे किं न आसीत् ?
(2) तस्य हस्ते कति रूप्यकाणि आसन् ?
(3) सः काभ्याम् एव कलकत्तां प्रति प्रस्थितः ?

**3. अस्य गद्यांशस्य कृते समुचितं शीर्षकं लिखत– (1)**

**4. अधोलिखितानां प्रश्नानाम् उत्तरं लिखत– (केवलं प्रश्नत्रयम्)** **( 1 x 3 = 3)**

(1) **''अष्टाविंशतिदिनानाम्''** अनयोः विशेषणपदं किम् ?
(क) दिनानाम् , (ख) अष्टाविंशति ,(ग) दिवसानाम् ,(घ) अष्टः

(2) गद्यांशे **'विक्रेतुं'** इति पदस्य विलोमपदं किम् ?
(क) गन्तुम् , (ख) क्रेतुम् , (ग) नेतुम् , (घ) खादितुम्

(3) गद्यांशे **'अर्जितवान्'** इति क्रियापदस्य कर्तृपदं किम् ?
(क) डॉ. नागः ,(ख) सः , (ग) एका ,(घ) एकदा

(4) **''एकदा सः कलकत्तानगरं प्रति प्रेषितः''** अस्मिन् वाक्ये क्रियापदं किम् ?
(क) प्रेषितः , (ख) प्रति , (ग) एकदा , (घ) सः

## (खण्डः –ब)
## रचनात्मक–कार्यम्

**2. विद्यालयात् अवकाशार्थं मुख्याध्यकं प्रति लिखितं पत्रं मञ्जुषायां दत्तैः पदैः पूरयत–** **(5)**

( मान्यवर ,भवदीयः शिष्यः ,कारणात् ,अहम् ,जयपुरं ,मुख्याध्यापक महोदय ,आगन्तुम् ,द्वयस्य ,निवेदनम् ,कृतज्ञः । )

सेवायाम् ,
(1) ......................
प्रज्ञा माध्यमिक–विद्यालयः
(2) ......................
(3) ......................
सविनयं (4) ................ अस्ति यत् अहम् अद्य विद्यालयं (5) .................... न शक्नोमि। तस्मात् (6)................ मह्यं दिन (7).......... .......... अवकाशं प्रदाय कृतार्थयन्तु भवन्तः। (8) ................ भवतः अतीव (9) .................. भविष्यामि।
दिनाङ्कः –05 / 03 / 25
(10) ...................
जयप्रकाशः

**3. मञ्जुषायां प्रदत्तशब्दानां सहायतया चित्रं दृष्ट्वा पञ्चवाक्यनि संस्कृतेन लिखत –** **(5)**




( चित्रं ,इदं ,आत्मनिर्भर ,प्रारम्भः ,भारतस्य ,प्रधानमंत्री ,महाभागः ,कृतवान् ,दृष्टिकोणम् ,एकः ,देशः ,भवेत् ,भवेयुः ,संसाधनं ,उपयोगः ,संसाधनानां ,अस्ति ,भारतम् ,सम्पन्नम् )

**अथवा**

**मञ्जुषायां प्रदत्तशब्दानां सहायतया " मम विद्यालयः" इति विषयम् अधिकृत्य पञ्च वाक्यनि संस्कृतेन लिखत–**

( आदर्शः ,विद्यालयः ,श्रेष्ठः ,प्राचार्यः ,अनेके ,शिक्षकाः ,विषयान् ,पञ्चसहस्त्रछात्राः ,बालक–बालिकाः ,प्रसिद्धः ,नगरस्य ,च , प्रार्थयन्ति ,पंक्तिबद्धाः ,नगरस्य ,वर्तते ,शिष्याः ,प्रतिदिनं ,अत्र ,पठन्ति ,अस्य ,कुशलः ,निपुणः ,सर्वे ,योग्याः ,सन्ति ,भूत्वा ,ईश्वरं छात्राः ,अपि ,मम।)

**4. अधोलिखितानि वाक्यानि संस्कृतभाषया अनुद्य लिखत ( केवलं–पञ्च)** **(5)**

(1) छात्र पढ़ने के लिए विद्यालय जाते है।
(2) प्रातःकाल आकाश में सूर्योदय होता है।
(3) सागर के तट पर अनेक नारियल के पेड़ है।
(4) श्रीकृष्ण की माता का नाम देवकी और पिता वसुदेव थे।
(5) विवेकानन्द का जन्म कलकत्ता नगर में हुआ था।
(6) हम दोनों गाँव जाएँगे।
(7) सीता गीत गाती है।

## (खण्डः –स)
## अनुप्रयुक्त–व्याकरणम्

**5.अधोलिखित–वाक्येषु रेखांकितपदानां समुचितं सन्धिं सन्धिविच्छेदं वा लिखत – (केवलं प्रश्नचतुष्टयम्)** **(4)**

(1) शिष्यः **अध्ययन + अर्थं** गुरूं प्रति गच्छति।
(2) **जगत् + ईशः** कं न रक्षति।
(3) **हित + उपदेशः** नारायणपण्डितस्य कृतिः।
(4) अयं मम **विद्यालयः** अस्ति।
(5) विद्या समं चक्षुः **न + अस्ति।**

**6. अधोलिखित–वाक्येषु प्रदत्तविकल्पेभ्यः उचित–शब्दरूपेण वाक्यपूर्तिं कृत्वा पुनः लिखत–** **(3)**

1) गङ्गा .................. पवित्रतमा नदी अस्ति।
(क) नदीः , (ख) नदीषु , (ग) नदीम् , (घ) नदीन्
(2) द्वौ .................. गच्छतः।
(क) बालकौ , (ख) बालके ,(ग) बालकः, (घ) बालकाः
(3) इदं कार्यं ................. न कृतम्।
(क) मम , (ख) अहम् , (ग) मया , (घ) त्वम्

**7. अधोलिखित–वाक्येषु प्रदत्तविकल्पेभ्यः उचित–धातुरूपेण वाक्यपूर्तिं कृत्वा पुनः लिखत–** **(3)**

(1) वयं न .....................।
(क) पठामः , (ख) पठसि, (ग) पठति , (घ) पठामि
(2) उत्तमाः बालाः पितरं ..................।
(क) सेव , (ख) सेवावे , (ग) सेवन्ते , (घ) सेवताम्
(3) अहं जलं ....................।
(क) पिबति , (ख) पिबामि ,(ग) पिबसि ,(घ) पिबामः

**8. अधोलिखित–वाक्येषु प्रदत्तविकल्पेभ्यः उचित–विभक्तिरूपेण वाक्यपूर्तिं कृत्वा पुनः लिखत–**
**(केवलं प्रश्नत्रयम्)** – **(3)**

(1) ................ सह शिष्याः अपि पठन्ति।
(क) गुरूणा , (ख) गुरूमा, (ग) गुरवे , (घ) गुरूभ्यः
(2) श्री .............. नमः।
(क) रामेण , (ख) रामात् , (ग) रामाय, (घ) रामेभ्यः
(3) .................. उपरि खगाः सन्ति।
(क) वृक्षस्य , (ख) वृक्षम् ,(ग) वृक्षे ,(घ) वृक्षाणि
(4) ................. बहिः देवालयम् अस्ति।
(क) ग्रामस्य , (ख) ग्रामात् ,(ग) ग्रामः , (घ) ग्रामेषु

**9. अधोलिखित–वाक्येषु प्रकृतिप्रत्ययौ संयोज्य पृथक्कृत्य वा विकल्पेभ्यः चित्वा लिखत–**
**(केवलं प्रश्नत्रयम्)** – **(3)**

(1) छात्रेण रामायणं **(श्रु + क्त्वा )** कथितः।
(क) श्रुणवा , (ख) श्रुत्वा , (ग) श्रुता , (घ) श्रृणोति
(2) वानरः वृक्षम् **(आ + रूह् + ल्यप् )** कूर्दते।
(क) आरूह्यल्यप् ,(ख) आरूढ़ , (ग) आरूह्य ,(घ) आरोहति
(3) सा तत्र किं **( कर्तुं )** गच्छति ?
(क) कृ + तुमुन् ,(ख) कतृ + तुमुन् , (ग) र्तु + तुमुन् , (घ) कृत् + तुमुन्
(4) चौरं **(बध् + क्त्वा )** अत्र आनय।
(क) बाधिता , (ख) बदित्वा , (ग) बद्ध्वा , (घ) बधित्वा

**10. अधोलिखित–वाक्येषु प्रदत्तविकल्पेभ्यः उचित–संख्या–शब्दरूपैः रिक्तस्थानानि पूरयित्वा पुनः लिखत**
**(केवलं प्रश्नत्रयम्)** – **(3)**

(1) मम गृहे .............. **(4)** वृक्षाः सन्ति।
(2) विद्यालये .............. **(3)** प्रयोगशालाः सन्ति।
(3) बालकः ................. **(4)** मोदकानि खादति।
(4) वृक्षे ................... **(5)** खगाः सन्ति।

**11. अधोलिखित–रेखाङ्कितपदानां प्रयुक्तान् उपसर्गान् लिखत– (केवलं प्रश्नत्रयम्)** **(3)**

(1) सः उद्याने **<u>विहरति</u>**।
(2) सा गृहात् **<u>निर्गच्छति</u>।**
(3) सा गृहं **<u>प्रत्यागच्छति</u>।**
(4) नृपः **<u>संहरति</u>।**

**12. वाक्यानुगुणम् उचिताव्ययपदं चिनुत –** **(3)**

(1) विद्यालये ................. वार्षिकोत्सवः अस्ति।

(क) अद्य , (ख) अधुना (ग) अधूयः , (घ) अदय

(2) अहं ............. जयपुरं गमिष्यामि।

(क) श्वः ,(ख) श्वाः, (ग) शिवम् ,(घ) शिवाय

(3) त्वं ................. आगच्छसि ।

(क) कत् ,(ख) क्त , (ग) क्त्वा , (घ) कुतः

**13. कालबोधकशब्दैः अधोलिखित–दिनचर्यां पूरयत। – (केवलं प्रश्नत्रयम्)** **(3)**

(1) प्रातः **(5:00)** .................. वादने जागरणम्।

(2) प्रातः **(5:30)** ................. वादने योगासनम्।

(3) प्रातः **(5:45)** ................. वादने स्नानम्।

(4) प्रातः **(6:15)** ................. वादने ध्यानम्।

## (खण्डः –ब)
## पठित–अवबोधनम्

**14. अधोलिखितं गद्यांशं पठित्वा प्रदत्त–प्रश्नानाम् उत्तराणि संस्कृतेन लिखत** **(4)**

नैतादृशः स्वर्णपक्षो रजतचञ्चुः स्वर्णकाकस्तया पूर्वं दृष्टः। तं तण्डुलान् खादन्तं हसन्तञ्च विलोक्य बालिका रोदितुमारब्धा। तं निवारयन्ती सा प्रार्थयत्–तण्डुलान् मा भक्षय। मदीया माता अतीव निर्धना वर्तते। स्वर्णपक्षः काकः प्रोवाच ,मा शुचः। सूर्योदयात्प्राग् ग्रामाद् बहिः पिप्पलवृक्षमनु त्वयागन्तव्यम्। अहं तुभ्यं तण्डुलमूल्यं दास्यामि। प्रहर्षिता बालिका निद्रामपि न लेभे।

**(अ) एकपदेन उत्तरत–** **( 0.5 x 2 = 1)**

(1) बालिकायाः माता कीदृशी वर्तते ?

(2) बालिका कं निवारयन्ति ?

**(ब) पूर्ण वाक्येन उत्तरत–** **( 1 x 2 = 2)**

(1) काकः बालिकां कुत्र आगन्तुं कथयति ?

(2) काकः कदा बालिकां ग्रामाद् बहिः आगन्तुं कथयति ?

**(स) ''धनिका'' इत्यस्य पदस्य विलोमपदं गद्यांशे किं प्रयुक्तम् ? ( 1)**

**15. अधोलिखितं पद्यांशं पठित्वा प्रदत्त–प्रश्नानाम् उत्तराणि संस्कृतेन लिखत** **(4)**

''गुणा गुणज्ञेषु गुणा भवन्ति ते निर्गुणं प्राप्य भवन्ति दोषाः।
आस्वाद्यतोयाः प्रवहन्ति नद्यः समुद्रमासाद्य भवन्त्यपेयाः।।''

**(अ) एकपदेन उत्तरत–** **( 0.5 x 2 = 1)**

(1) गुणा गुणज्ञेषु कीदृशः भवन्ति ?

(2) निर्गुणं प्राप्य गुणाः किं भवन्ति ?

**(ब) पूर्णवाक्येन उत्तरत–** **( 1 x 2 = 2)**

(1) समुद्रमासाद्य नद्यः कीदृशः भवन्ति ?

(2) गुणाः दोषाः कदा भवन्ति ?

**(स) गुणा गुणज्ञेषु गुणा भवन्ति'' अत्र क्रियापदं किम् ?** **( 1)**

**16. अधोलिखितं नाट्यांशं पठित्वा प्रदत्त–प्रश्नानाम् उत्तराणि संस्कृतेन लिखत** **(4)**

**पुरूषः** – भो तपस्विन्!कथं मामुपरूणत्सि। प्रयत्नेन किं न सिद्धं भवति। कावश्यक्ता शिलानाम् ? सिकताभिरेव सेतुं करिष्यामि स्वसंकल्पदृढ़तया।

**तपोदत्तः** – आश्चर्यम्! सिकताभिरेव सेतुं करिष्यसि ? सिकता जलप्रवाहे स्थास्यन्ति किम् ? भवता चिन्तितं न वा ।

**पुरूषः** – (सोत्प्रासम् ) चिन्तितं चिन्तितम्। सम्यक् चिन्तितम्। नाहं सोपानमार्गैरट्टमधिरोढुं विश्वसिमि। समुत्प्लुत्यैव गन्तुं क्षमोऽस्मि।

**तपोदत्तः** – (सव्यङ्ग्यम्) साधु–साधु आञ्जनेयमप्यतिक्रामसि।

**पुरूषः** – (सविमर्शम्)
कोऽत्र संदेहः ? किञ्च
विना लिप्यक्षरज्ञानं तपोभिरेव केवलम्।
यदि विद्या वशे स्युस्ते, सेतुरेष तथा मम।

**(1) एकपदेन उत्तरत–** **( 0.5 x 2 = 1)**
(क) केषाम् आवश्यक्ता नास्ति ?
(ख) ''भो तपस्विन्'' इति कः सम्बोधयति ?

**(2) पूर्णवाक्येन उत्तरत–** **( 1 x 2 = 2)**
(क) सिकताभिरेव किं करिष्यसि ? ?
(ख) सोपानमार्गेरट्टमधिरोढुं कः न विश्वसिति। ?

**(3) '' प्रयत्नेन किं न सिद्धं भवति'' अस्मिन् वाक्ये किं क्रियापदं प्रयुक्तम् ?** **( 1)**

**17. अधोलिखितेषु रेखांकित–पदानि आधृत्य प्रश्ननिर्माणं कुरूत–** **(4)**
(1) बाल्ये **<u>पितृचरणैः</u>** क्लेश्यमानोऽपि विद्यां नाऽधीतवानस्मि।
(2) एष इदानीं **<u>तपश्चर्यया</u>** विद्यामवाप्तुं प्रवृतोऽस्मि।
(3) तीव्र–प्रवाहायां नद्यां मूढ़ोऽयं **<u>सिकताभिः</u>** सेतुं निर्मातुं प्रयतते।
(4) तदियं भगवत्या शारदायाः **<u>अवमानना</u>** ।

**18. मञ्जुषातः समुचितपदानि चित्वा अधोलिखित–श्लोकस्य–अन्वयं पूरयत–** **(4)**
**''रामो बबन्ध यं सेतुं शिलाभिर्मकरालये।**
**विद्धद् बालुकाभिस्तं यासि त्वमतिरामताम्।।''**

**अन्वयः** – (1) ...................... बबन्ध यं (2) ................ शिलाभिर्मकरालये विद्धद् (3) ................ तं यासि त्वमति (4) ................. ।
( रामताम् , बालुकाभिः ,सेतुं , रामः )

**अथवा**

**अधोलिखितं श्लोकं पठित्वा मञ्जुषायाः पदानि चित्वा भावार्थं पूरयत–**
**'' परिधानैरलङ्कारैर्भूषितोऽपि न शोभते।**
**नरो निर्माणभोगीव सभायां यदि वा गृहे।।''**

**भावार्थः** – अशिक्षित (1) ................. मणिहीनसर्प इव (2) ................. सम्मर्दे गृहे वा वस्त्रैः (3) ..................... सुसज्जितोऽपि (4) .................... न भवति।
( शोभामानः , आभूषणैः , विद्वज्जन् , मानवः )

**19. अधोलिखितं कथांशं समुचित–क्रमेन लिखत–** **(4)**
(1) सन्त्वेते निष्कुटवासिन एव प्राणिनो मम वयस्यः इति।
(2) ननु भूयो द्रक्ष्यामि क्रुद्धस्य उपाध्यायस्य मुखम्।
(3) अहं पुनरात्मानं विनोदयिष्यामि।
(4) य चिन्तयामास–विरमन्त्वेते वराकाः पुस्तकदासाः।
(5) तन्द्रालुर्बालो लज्जया तेषां दृष्टिपथमपि परिहन्नेकाकी किमप्युद्यानं प्रविवेश।
(6) यतस्ते सर्वेऽपि पूर्वदिनपाठान् स्मृत्वा विद्यालयगमनाय त्वरमाना बभूवुः।
(7) तेन सह केलिभिः कालं क्षेप्तुं तदा कोऽपि न वयस्येषु उपलभ्यमान आसीत्।
(8) भ्रान्तः कश्चन बालः पाठशालागमनवेलायां क्रीडितुं निर्जगाम्।

**20. (क) अधोलिखित–वाक्येषु रेखाङ्कितपदानां प्रसङ्गानुकूलम् उचितार्थं लिखत– (केवलं प्रश्नत्रयम्)** **(3)**
(1) गुणयुक्तो **<u>दरिद्रः</u>** जनः अपि पूज्यते।
(क) धनवानः , (ख) निर्धनः , (ग) धनाढयः , (घ) समृद्धिः
(2) सर्वे **<u>जन्तवः</u>** प्रियवाक्येन तुष्यन्ति।
(क) प्रणितः , (ख) प्रचारितः , (ग) पराणितः , (घ) पवित्रः
(3) कृषकाः अन्नं स्वयमेव न **<u>अदन्ति</u>**।
(क) खादन्ति ,(ख) खादिता , (ग) खादति , (घ) खादसि
(4) परोपकाराय सतां **<u>विभूतयः</u>**।
(क) विपतयः ,(ख) सम्पतयः , (ग) उपयुक्तः , (ग) आवृतः